संस्कृत

क्र. ६१

पुराण

3830

# अद्भुत रामायण

४१० पृ. ७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीगणेशायनमः॥ अथअद्भुतरामायणप्रारंभः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥
देवींसरस्वतींव्यासंततोजयमुदीरयेत् ॥ १ ॥ नमस्तस्मैमुनींद्रायश्रीयुताययशस्विने ॥
शांतायवीतरागायवाल्मीकायनमोनमः ॥ २ ॥ रामायरामभद्रायरामचंद्रायवेधसे ॥
रघुनाथायनाथायसीतायाःपतयेनमः ॥ ३ ॥ जयतिरघुवंशतिलकःकौशल्यानंदव
र्द्धनोरामः॥ दशवदननिधनकारीदाशरथिःपुंडरीकाक्षः॥४॥ ॥तमसातीरनिलयंनि
लयंतपसांगुरुं॥ वचसांप्रथमस्थानंवाल्मीकिंमुनिपुंगवं ॥ १ ॥ विनयावनतोभूत्वाभा
रद्वाजोमहामुनिः ॥ अपृच्छत्समतःशिष्यःकृतांजलिपुटोवशी ॥ २ ॥ रामायणमिति
ख्यातंशतकोटिप्रविस्तरं॥ प्रणीतंभवतायच्चब्रह्मलोकेप्रतिष्ठितं॥ ३ ॥ श्रूयतेब्राह्मणैर्नि
त्यमृषिभिःपितृभिःसुरैः ॥ पंचविंशतिसाहस्रंरामायणमिदंभुवि ॥ ४ ॥ तदाकर्णितम
स्माभिःसविशेषंमहामुने॥ शतकोटिप्रविस्तारेरामायणमहार्णवे॥ ५ ॥ किंगीतमिहमु
ष्णातितन्मेकथयसुव्रत॥ आकर्ण्यादरिणःपृष्टंभारद्वाजस्यवैमुनिः॥ ६॥ हस्तामलकव
त्सर्वंसस्मारशतकोटिकं ॥ ओमित्युक्तामुनिःशिष्यंप्रोवाचवदतांवरं ॥ ७ ॥ भारद्वाज

चिरंजीवसाधुस्मारितमद्यनः ॥ शतकोटिप्रविस्तारेरामायणमहार्णवे ॥ ८ ॥ रामस्य 
चरितंसर्वमाश्चर्यंसम्यगीरितं ॥ पंचविंशतिसाहस्रंनृलोकेयत्प्रतिष्ठितं ॥ ९ ॥ नृणांहि 
 सदृशंरामचरितंवर्णितंततः ॥ सीतामाहात्म्यसारंयद्विशेषादत्रनोक्तवान् ॥ १० ॥ शृ
णुष्वावहितोब्रह्मन्काकुत्स्थचरितंमहत् ॥ सीतायामूलभूतायाःप्रकृतेश्चरितंमहत् ॥ ११ ॥
आश्चर्यमाश्चर्यमिदंगोपितंब्रह्मणोगृहे ॥ हितायप्रियशिष्यायतुभ्यमावेदयामितत् ॥
॥ १२ ॥ जानकीप्रकृतिःसृष्टेरादिभूतामहागुणा ॥ तपःसिद्धिःस्वर्गसिद्धिर्भूतिर्भूतिमतां
सती ॥ १३ ॥ विद्याविद्याचमहतीगीयतेब्रह्मवादिभिः ॥ ऋद्धिःसिद्धिर्गुणमयीगुणाती
तागुणात्मिका ॥ १४ ॥ ब्रह्मब्रह्मांडसंभूतासर्वकारणकारणं ॥ प्रकृतिर्विकृतिर्देवीचिन्म
यीचिद्विलासिनी ॥ १५ ॥ महाकुंडलिनीसर्वानुस्यूताब्रह्मसंज्ञिता ॥ तस्याविलसितंस
र्वंजगदेतच्चराचरं ॥ १६ ॥ यामाधायहृदिब्रह्मन्योगिनस्तत्त्वदर्शिनः ॥ विघट्टयंतिहृद्ग्रंथिं
भवंतिसुखमूर्तिकाः ॥ १७ ॥ यदायदाहिधर्मस्यग्लानिर्भवतिसुव्रत ॥ अभ्युत्थानमधर्म 
स्यतदाप्रकृतिसंभवः ॥ १८ ॥ रामःसाक्षात्परंज्योतिःपरंधामपरःपुमान् ॥ आकृतौपर

(2A)

मोभेदोनसीतारामयोर्यतः ॥ १९ ॥ रामःसीताजानकीरामभद्रोनाणुर्भेदोनैतयोरस्ति
कश्चित् ॥ संतोबुध्वातत्त्वमेतद्विबुद्धाःपारंयाताःसंसृतेर्मृत्युवक्रात् ॥ २० ॥ रामोचिंत्यो
नित्यचित्सर्वसाक्षीसर्वांतस्थःसर्वलोकैककर्ता ॥ भर्ताहर्तानंदमूर्तिर्विभूमासीतायोगा
च्चिंत्यतेयोगिभिःसः ॥ २१ ॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः ॥
सवेत्तिविश्वंनहितस्यवेत्तातमाहुरग्र्यंपुरुषंपुराणं ॥ २२ ॥ तयोःपरंजन्मउदाहरिष्येययो
र्यथाकारणदेहधारिणोः ॥ अरूपिणोरूपविधारणंपुनर्नृणांमहानुग्रहएवकेवलं ॥ २३ ॥
पठन्द्विजोवागृषभत्वमीयात्क्षत्रान्वयोभूमिपतित्वमीयात् ॥ वणिग्जनःपुण्यफलत्व
मीयाच्छृण्वन्हिशूद्रोपिमहत्वमीयात् ॥ २४ ॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेअ
द्भुतोत्तरकांडेआदिकाव्येप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ भारद्वाजशृणुष्वा
थरामचंद्रस्यधीमतः ॥ जन्मनःकारणंविप्रइक्ष्वाकुकुलवारिधौ ॥ १ ॥ सीतायाश्चमहा
देव्याःपृथिव्यांजन्महेतुकं ॥ तत्ररामकथामादौवक्ष्यामिमुनिपुंगव ॥ २ ॥ श्रूयतांमु
निशार्दूलअंबरीषकथालयं ॥ पुरुषोत्तममाहात्म्यंसर्वपापहरंपरं ॥ ३ ॥ त्रिशंकोर्दयिता

भार्यासर्वलक्षणशोभिता ॥ अंबरीषस्यजननीनित्यंशौचसमन्विता ॥ ४ ॥ योगनिद्रांस
मारूढंशेषपर्यंकशायिनं ॥ नारायणंमहात्मानंब्रह्मांडकमलोद्भवं ॥ ५ ॥ तमसाकालरु
द्राख्यंरजसाकनकांडजं ॥ सत्वेनसर्वगंविष्णुंसर्वदेवनमस्कृतं ॥ ६ ॥ अर्चयामासस
ततंवाङ्मनःकायवृत्तिभिः ॥ माल्यदामादिकंसर्वंस्वयमेवव्यचीकरत् ॥ ७ ॥ गंधादि
पेषणंचैवधूपद्रव्यादिकंतथा ॥ तत्सर्वंकौतुकाविष्टास्वयमेवचकारसा ॥ ८ ॥ शुभापद्मा
वतीनित्यंवचोनारायणेतिच ॥ अनंतेतिचसानित्यंभाषमाणायतव्रता ॥ ९ ॥ दशवर्षसह
स्राणितत्परेणांतरात्मना ॥ अर्चयामासगोविंदंगंधपुष्पादिभिःशुभैः ॥ १० ॥ विष्णुभ
क्तान्महाभागान्सर्वपापविवर्जितान् ॥ दानमानार्चनैर्नित्यंधनैरत्नैरतोषयत् ॥ ११ ॥
ततःकदाचित्सादेवीद्वादश्यांसमुपोष्यवै ॥ हरेरग्रेमहाभागासुष्वापपतिनासह ॥ १२ ॥ त
त्रनारायणोदेवस्तामाहपुरुषोत्तमः ॥ किमिच्छसिवरंभद्रेमत्तःकिंब्रूहिभामिनि ॥ १३ ॥
सादृष्वातंवरंवव्रेपुत्रस्त्वद्भक्तिमान्भवेत् ॥ सार्वभौमोमहातेजाःस्वकर्मनिरतःशुचिः ॥
॥ १४ ॥ तथेत्युक्त्वाददौतस्यैफलमेकंजनार्दनः ॥ साप्रबुद्धाफलंदृष्वाभर्त्रेसर्वंनिवेद्यच ॥

(3A)

॥ १५॥ भक्षयामाससंदष्ट्यफलंतद्धृष्टमानसा ॥ ततःकालेनसादेवीपुत्रंकुलविवर्धनं॥
॥ १६ ॥ असूयतशुभाचारंवासुदेवपरायणं ॥ शुभलक्षणसंपन्नंचक्रांकितमनुत्तमं॥
॥ १७॥ जातंदृष्ट्वापितापुत्रंक्रियाःसर्वाश्चकारवै ॥ अंबरीषइतिख्यातोलोकेसमभवत्प्र
भुः ॥ १८ ॥ पितर्युपरतेश्रीमानभिषिक्तोमहात्मभिः ॥ मंत्रिष्वाधायराज्यंचतपउग्रंच
कारसः ॥ १९ ॥ संवत्सरसहस्रंवैजपन्नारायणंप्रभुं॥ हृत्पुंडरीकमध्यस्थंसूर्यमंडलमध्य
गं॥ २०॥ शंखचक्रगदापद्मंधारयंतंचतुर्भुजं ॥ शुद्धजांबूनदनिभंब्रह्मविष्णुशिवात्म
कं॥ २१ ॥ सर्वाभरणसंयुक्तंपीतांबरधरंप्रभुं॥ श्रीवत्सवक्षसंदेवंपुरुषंपुरुषोत्तमं॥ २२॥
ततोगरुडमारुह्यसर्वदेवैरभिष्टुतः॥ आजगामसविश्वात्मासर्वलोकनमस्कृतः॥ २३॥
ऐरावतमिवाचिंत्यंकृत्वावैगरुडंहरिः॥ स्वयंशक्रइवासीनस्तमाहनृपसत्तमं ॥ २४ ॥ इं
द्रोहमस्मिभद्रंतेकिंददामितवाद्यवै ॥ सर्वलोकेश्वरोहंत्वांरक्षितुंसमुपागतः॥ २५॥ अं
बरीषस्तुतंदृष्ट्वाशक्रमैरावतस्थितं ॥ उवाचवचनंधीमान्विष्णुभक्तिपरायणः ॥ २६॥
नाहंत्वामभिसंधायतपआस्थितवानिह ॥ त्वयादत्तंचनेच्छामिगच्छशक्रयथासुखं॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥ २७॥ ममनारायणोनाथस्त्वांनस्तोष्येमराधिप ॥ व्रजेंद्रमाकृथास्त्वत्रममाश्रमविलो
पनं ॥ २८ ॥ ततःप्रहस्यभगवान्स्वरूपमकरोद्धरिः ॥ शार्ङ्गचक्रगदापाणिःशंखहस्तोज
नार्दनः ॥ २९ ॥ गरुडोपरिविश्वात्मानीलाचलइवापरः ॥ देवगंधर्वसंघैश्चस्तूयमानःस
मंततः ॥ ३० ॥ प्रणम्यराजासंतुष्टस्तुष्टावगरुडध्वजं ॥ प्रसीदलोकनाथस्त्वंममनाथज
नार्दन ॥ ३१ ॥ कृष्णकृष्णजगन्नाथसर्वलोकनमस्कृत ॥ त्वमादिस्त्वमनादिस्त्वमनंतःपु
रुषःप्रभुः ॥ ३२॥ अप्रमेयोविभुर्विष्णुर्गोविंदःकमलेक्षणः ॥ महेश्वरांशजोमध्यःपुष्करः
खगमःखगः ॥ ३३॥ कव्यवाहःकपालीत्वंहव्यवाहःप्रभंजनः ॥ आदिदेवःक्रियानंदःपर
मात्मनिसंस्थितः ॥ ३४ ॥ त्वांप्रपन्नोस्मिगोविंदपाहिमांपुष्करेक्षण ॥ नान्यागतिस्त्वद
न्यामेत्वामेवशरणंगतः ॥ ३५ ॥ तमाहभगवान्विष्णुःकिंतेहृदिचिकीर्षितं ॥ तत्सर्वंसं
प्रदास्यामिभक्तोसिममसुव्रत ॥ ३६ ॥ भक्तप्रियोस्मिसततंतस्माद्दातुमिहागतः ॥ अंब
रीषस्तुतच्छ्रुत्वाहर्षगद्गदयागिरा ॥ ३७ ॥ प्रोवाचपरमात्मानंनारायणमनामयं ॥ त्वयि
विष्णौपरानंदेनित्यंमेवर्ततांमतिः ॥ ३८ ॥ भवेयंत्वत्परोनित्यंवाङ्मनःकायकर्मभिः ॥

(3A)

पालयिष्यामिपृथिवींकृत्वावैवैष्णवंजगत् ॥ ३९ ॥ यज्ञहोमार्चनैश्चैवतर्पयिष्यामिसुरोत्त
मान् ॥ वैष्णवान्पालयिष्यामिहनिष्यामिचशात्रवान् ॥ ४० ॥ एवमुक्तस्तुभगवान्प्र
त्युवाचनृपोत्तमं ॥ एवमस्तुतवेच्छावैचक्रमेतत्सुदर्शनं ॥ ४१ ॥ पुरारुद्रप्रभावेनलब्धंवै
दुर्लभंमया ॥ ऋषिशापादिकंदुःखंशत्रुरोगादिकंतथा ॥ ४२ ॥ निहनिष्यतितेदुःखमि
त्युक्त्वांतरधीयत ॥ ततःप्रणम्यमुदितोराजानारायणंप्रभुं ॥ ४३ ॥ प्रविश्यनगरींदिव्याम
योध्यांपर्यपालयत् ॥ ब्राह्मणादींस्तथावर्णान्स्वेस्वेकर्मण्ययोजयत् ॥ ४४ ॥ नारायणप
रोनित्यंविष्णुभक्तानकल्मषान् ॥ पालयामासहृष्टात्माविशेषेणजनाधिपः ॥ ४५ ॥ अ
श्वमेधशतैरिष्ट्वावाजपेयशतानिच ॥ पालयामासपृथिवींसागरावरणामिमां ॥ ४६ ॥
गृहेगृहेहरिस्तस्थौवेदघोषोगृहेगृहे ॥ नामघोषोहरेश्चैवयज्ञघोषस्तथैवच ॥ ४७ ॥ अभवन्नृ
पशार्दूलेतस्मिन्राज्यंप्रशासति ॥ नासस्यानातृणाभूमिर्नदुर्भिक्षादिभिर्युता ॥ ४८ ॥ रो
गहीनाप्रजानित्यंसर्वोपद्रववर्जिता ॥ अंबरीषोमहातेजाःपालयामासमेदिनीं ॥ ४९ ॥
सवैमहात्मासततंचरक्षितःसुदर्शनेनातिसुदर्शनेन ॥ शुभांसमुद्रावधिसंततांमहींसुपा

लयामासमहीमहेंद्रः॥ ५०॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेअद्भुतोत्तरकांडेअंबरीषव
रप्रदानोनामद्वितीयःसर्गः॥ २॥ ॥ छ॥ तस्यैवंवर्तमानस्यकन्याकमललो
॥४॥ चना॥ श्रीमतीनामविख्यातासर्वलक्षणशोभिता॥ १॥ तस्मिन्कालेमुनिःश्रीमान्ना
रदोभ्यागतोगृहं॥ अंबरीषस्यराज्ञोवैपर्वतश्चमहाद्युतिः॥ २॥ तावुभावागतौदृष्ट्वाप्रणि
पत्ययथाविधि॥ अंबरीषोमहातेजाःपूजयामासतौनृपः॥ ३॥ कन्यांतुप्रेक्ष्यभगवान्ना
रदःप्राहविस्मितः॥ केयंराजन्महाभागाकन्यासुरसुतोपमा॥४॥ब्रूहिधर्मभृतांश्रेष्ठसर्व
लक्षणशोभिता॥ निशम्यवचनंतस्यराजाप्राहकृतांजलिः॥ ५॥ दुहितेयंममविभोश्री
मतीनाममनामतः॥ प्रदानसमयंप्राप्तावरमन्वेषतीशुभा॥ ६॥ इत्युक्तोमुनिशार्दूलस्ता
मैच्छन्नारदोद्विजः॥ पर्वतोपिमुनिस्तांवैचकमेसर्षिसत्तमः॥ ७॥ अनुज्ञाप्यचराजानं
नारदोवाक्यमब्रवीत्॥ रहस्याहूयधर्मात्माममदेहिसुतामिमां॥ ८॥ पर्वतोपितथाप्राह
राजानंरहसिप्रभुं॥ तावुभौप्राहधर्मात्माप्रणिपत्यभयार्दितः॥ ९॥ उभौभवंतौकन्यांमे ॥४॥
प्रार्थयानौकथंत्वहं॥ करिष्यामिमहाप्राज्ञौश्रृणुनारदमेवचः॥ १०॥ त्वंचपर्वतमेवाक्यं

5A)

श्रृणुवक्ष्यामियत्प्रभो॥ कन्येयंयुवयोरेकंवरयिष्यतिचेच्छुभा॥ १ १॥तस्मैकन्यांप्रयच्छा
मिनान्यथाशक्तिरस्तिमे॥ तथेत्युक्त्वातुतौविप्रौश्वआयास्यावएवहि॥ १ २॥ इत्युक्त्वामु
निशार्दूलौजग्मतुःप्रीतमानसौ ॥ वासुदेवपरौनित्यमुभौज्ञानवतांवरौ ॥ १ ३॥ विष्णु
लोकंततोगत्वानारदोमुनिसत्तमः॥ प्रणिपत्यहृषीकेशंवाक्यमेतदुवाचह॥ १ ४॥ वृत्तां
तंसर्वमाख्यायनाथनारायणाव्यय ॥ रहसित्वांप्रवक्ष्यामिनमस्तेभुवनेश्वर॥ १ ५॥ त
तःप्रहस्यगोविंदःसर्वात्माकर्मठंमुनिं ॥ ब्रूहीत्याहसविश्वात्मामुनिराहचकेशवं॥ १ ६॥
त्वदीयोनृपतिःश्रीमानंबरीषोमहामतिः॥ तस्यकन्याविशालाक्षीश्रीमतीनामनामतः॥
॥ १ ७॥ परिणेतुमहंतांवैइच्छामिवचनंश्रृणु ॥ पर्वतोयंमुनिःश्रीमांस्तवभृत्यस्तपोनि
धिः॥ १ ८॥ तामैच्छत्सोपिभगवंस्तमाहचजनाधिपः॥ अंबरीषोमहातेजाःकन्यायंयुव
योर्वरं॥ १ ९॥ लावण्ययुक्तंवृणुयाद्यदितस्मैददाम्यहं॥ इत्याहावांनृपस्तत्रतथेत्युक्त्वाप्य
हंततः॥ २ ०॥ आगमिष्यामितेराजन्श्वःप्रभातेगृहंप्रति॥ आगतोहंजगन्नाथकर्तुमर्ह
सिमेप्रियं॥ २ १॥ वानराननवद्भातिपर्वतस्यमुखंयथा॥ तथाकुरुजगन्नाथममचेदि

च्छसिप्रियं॥ २२॥ श्रीमतीतुतथापश्येन्नान्यःपश्येत्तथाविधं ॥ तथेत्युक्त्वासगोविंदःप्र
हस्यमधुसूदनः ॥ २३॥ त्वयोक्तंतत्करिष्यामिगच्छसौम्ययथासुखं ॥ एवमुक्तोमुनिर्हृ
ष्टःप्रणिपत्यजनार्दनं॥ २४॥ मन्यमानःकृतात्मानमयोध्यांवैजगामसः॥ गतेमुनिवरे
तस्मिन्पर्वतोपिमहामुनिः॥ २५॥ प्रणम्यमाधवंहृष्टोरहस्येनमुवाचह॥ वृत्तांतंचनिवे
द्याग्रेनारदस्यजगत्पते॥ २६॥ गोलांगूलमुखंयद्वन्मुखंभातितथाकुरु॥ श्रीमतीतुतथा
पश्येन्नान्यःपश्येत्तथाविधं ॥ २७॥ तच्छ्रुत्वाभगवान्विष्णुस्त्वयोक्तंचकरोमिवै॥ गच्छ
शीघ्रमयोध्यांत्वंमावादीर्नारदस्यवै ॥ २८॥ त्वयामेमंत्रितंयच्चतथेत्युक्त्वाजगामसः॥
ततोराजासमाज्ञायप्राप्तौमुनिवरौतदा ॥ २९ ॥ मंगलैर्विविधैर्भद्रैरयोध्यांध्वजमालि
नीं॥ मंडयामासलाजैश्चपुष्पैश्चैवसमंततः ॥ ३० ॥ अभिषिक्तगृहद्वारांसिक्तांगणमहा
पथां॥ दिव्यगंधरसोपेतांधूपितांदिव्यधूपकैः ॥ ३१ ॥ कृत्वाचनगरींराजामंडयामास
तांसभां ॥ दिव्यगंधैस्तथाधूपैरत्नैश्चविविधैस्तथा॥ ३२॥ अलंकृतांमणिस्तंभैर्नानामा

१ सर्वतोभद्रैः

(6A)

ल्योपशोभितैः ॥ परार्ध्यास्तरणोपेतैर्दिव्यभद्रासनैर्वृतां ॥ ३३ ॥ नानाजनसमावेशैर्नरें
द्रैरभिसंवृतां ॥ कृत्वानृपेंद्रस्तांकन्यामादायप्रविवेशह ॥ ३४ ॥ सर्वाभरणसंपन्नाश्रीरि
वायतलोचना ॥ करसंमितमध्यांगीपंचस्निग्धाशुभानना ॥ स्त्रीभिःपरिवृतादिव्याश्रीम
तीसंस्थितासती ॥ ३५ ॥ सभातुसाभूमिपतेःसमृद्धामणिप्रवेकोत्तमरत्नचित्रा ॥ न्यस्तास
नामाल्यवतीसुगंधातामन्वयुस्तेसुरराजवर्याः ॥ ३६ ॥ अथाययौब्रह्मवरात्मजोमहांस्त्रै
विद्यवृद्धोभगवान्महात्मा ॥ सपर्वतोब्रह्मविदांवरिष्ठोमहामुनिर्नारदआजगाम ॥ ३७ ॥
इत्यार्षेश्रीम० वाल्मी० आदिकाव्येअद्भुतोत्तरकांडेनारदपर्वतसभाप्रवेशोनामतृतीयः
सर्गः ॥ ३ ॥ ॥ ६९ ॥ तावागतौसमीक्ष्याथराजासंभ्रांतमानसः ॥ दिव्यमासनमा
दिश्यपूजयामासतावुभौ ॥ १ ॥ उभौदेवऋषीदिव्यौनित्यज्ञानवतांवरौ ॥ समासीनौम
हात्मानौकन्यार्थेमुनिसत्तमौ ॥ २ ॥ तावुभौप्रणिपत्याग्रेकन्यांतांश्रीमतींशुभां ॥ स्थितां
कमलपत्राक्षींप्राहराजायशस्विनीं ॥ ३ ॥ अनयोर्यंवरंभद्रेमनसात्वमिहेच्छसि ॥ तस्मै
मालामिमांदेहिप्रणिपत्ययथाविधि ॥ ४ ॥ एवमुक्तातुसाकन्यास्त्रीभिःपरिवृतातदा ॥ मा

अद्भुत लांहिरण्मयींदिव्यामादायशुभलोचना ॥ ५ ॥ तस्थौतामाहराजासौवत्सेकिंत्वंकरिष्य रा.स.
सि ॥ ६ ॥ अनयोरेकमुद्दिश्यदेहिमालामिमांशुभे ॥ साप्राहपितरंत्वस्ताइमौतुवानरान ४
॥६॥ नौ ॥ ७ ॥ मुनिश्रेष्ठौनपश्यामिनारदंपर्वतंतथा ॥ अनयोर्मध्यतस्त्वेकंवरंषोडशवार्षिकं
॥ ८ ॥ सर्वाभरणसंयुक्तमतसीपुष्पसन्निभं ॥ दीर्घबाहुंविशालाक्षंतुंगोरःस्थलमुत्तमं ॥
॥ ९ ॥ चामीकरांधंकरणपटयुग्मकशोभितं ॥ विभक्तत्रिवलीयुक्तनाभिव्यक्तकृशोदरं ॥
॥ १० ॥ हिरण्याभरणोपेतंसुरगकनखंशुभं ॥ पद्माकारकरंत्वेनंपद्मास्यंपद्मलोचनं ॥
॥ ११ ॥ पद्मांघ्रिपद्महृदयंपद्मनाभिंश्रियावृतं ॥ दंतपंक्तिभिरत्यर्थंकुंदकुड्मलसन्निभं ॥
॥ १२ ॥ हसंतंमांसमालोक्यदक्षिणंचप्रसार्यवै ॥ पाणिंस्थितमिमंछन्नंपश्यामिशुभमू
र्धजं ॥ १३ ॥ एवमुक्तेमुनिःप्राहनारदःसंशयंगतः ॥ कियंतोबाहवस्तस्यकन्येवदयथात
थं ॥ १४ ॥ बाहुद्वयंचपश्यामीत्याहकन्यासुविस्मिता ॥ प्राहतांपर्वतस्तत्रतस्यवक्षस्थ
लेशुभे ॥ १५ ॥ किंचपश्यसिमेब्रूहिकरेकिंधारयत्यपि ॥ कन्यातमाहमालांवैचंचद्रूपाम ॥६॥
नुत्तमां ॥ १६ ॥ वक्षस्थलेस्यपश्यामिकरेकार्मुकसायकौ ॥ एवमुक्तौमुनिश्रेष्ठौपरस्पर

Joint project of the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(7A)

मनुत्तमौ ॥ १७॥ मनसाचिंतयंतौतौमायेयंकस्यचिद्भवेत् ॥ मायावीतस्करोनूनंस्वय
मेवजनार्दनः॥ १८॥आगतोनान्यथाकुर्यात्कथंमेऽन्योमुखंत्विदं ॥ गोलांगूलीयमित्येवं
चिंतयामासनारदः॥ १९॥पर्वतोपितथैवैतद्वानरत्वंकथंमया॥प्राप्तमित्येवसहसाचिंता
मापेदिवांस्तथा ॥ २०॥ ततोराजाप्रणम्यासौनारदंपर्वतंतथा॥भवद्भ्यांकिमिदंभद्रौकृतं
बुद्धिविमोहनं॥ २१ ॥स्वस्थौभवंतौतिष्ठतांयदिकन्यार्थमुद्यतौ ॥ एवमुक्तौमुनिश्रेष्ठौनृप
मूचतुरुल्बणौ ॥ २२ ॥ त्वमेवमोहंकुरुषेनावामिहकथंचन ॥ आवयोरेकमेषातेवरयत्वे
वभामिनी ॥ २३॥ततःसाकन्यकाभूयःप्रणिपत्यचदेवतां॥पित्रानियुक्तासहसामुनिशा
पभयाद्द्विज॥ २४॥मालामादायतिष्ठंतीतयोर्मध्येसमाहिता॥पूर्ववत्पुरुषंदृष्ट्वामाल्यंतस्मै
ददौहिसा॥ २५॥अनंतरंचसाकन्यादृष्टानमनुजैःपुरः॥ततोनादःसमभवत्किमेतदितिवि
स्मयात्॥ २६॥तामादायगतोविष्णुःस्वस्थानंपुरुषोत्तमः॥पुरातदर्थमनिशंतपस्तप्त्वाव
रांगना॥ २७॥ श्रीमतीयंसमुत्पन्नासागताचतथाहरिं ॥ तावुभौमुनिशार्दूलौधिक्त्वामि
त्येवदुःखितौ॥ २८॥वासुदेवंप्रतितदाजग्मतुर्भवनंहरेः॥तावागतौसमीक्ष्याहश्रीमतींभ

गवान्हरिः॥ २९ ॥ मुनिश्रेष्ठौसमायातौगूहस्वात्मानमत्रवै॥तथेत्युक्ताचसादेवीप्रहसंती चकारह॥ ३० ॥ नारदःप्रणिपत्याग्रेप्राहदामोदरंहरिं ॥ किमिदंकृतवानघममत्वंपर्वतस्य च॥ ३१ ॥ त्वमेवनूनंगोविंदकन्यांतांहृतवानसि ॥ तच्छ्रुत्वापुरुषोविष्णुःपिधायश्रोत्रम च्युतः ॥ ३२ ॥ पाणिभ्यांप्राहभगवान्भवताकिमुदीरितं ॥ कामवादोनभावोयंमुनिवृ त्तेरहोकिल ॥ ३३ ॥ एवमुक्तोमुनिःप्राहवासुदेवंसनारदः ॥ कर्णमूलेममकथंगोलांगूल मुखंत्विति ॥ ३४ ॥ तदाकर्ण्यमहाबुद्धिर्देवोनारायणोहरिः ॥ कर्णमूलेतमाहेदंवानरास्यं कृतंमया ॥ ३५ ॥ पर्वतस्यतथाविप्रगोलांगूलमुखंतव ॥ यथाभवांस्तथासोपिप्रार्थया मासनिर्जने ॥ ३६ ॥ मामेवंभक्तिवशगस्तथास्म्यकरवंमुने ॥ नस्वेच्छयाकृतंतद्वांप्रिया र्थंनान्यथात्विति ॥ ३७ ॥ याचतेयच्चयश्चैवतच्चतस्यददाम्यहं ॥ नदोषोत्रगुणोवापियुव योर्ममवाद्विज ॥ ३८ ॥ पर्वतोपितथाप्राहतस्याप्येवंजगादसः ॥ शृण्वतोरुभयोस्तत्र प्राहदामोदरोवचः ॥ ३९ ॥ प्रियंभवतोःकृतवान्सत्येनायुधमालभे ॥ नारदःप्राहधर्मा त्माआवयोर्मध्यतःस्थितः ॥ ४० ॥ धनुष्मान्द्विभुजःकोनुतांहृत्वागतवान्किल॥ तच्छ्रुत्वा





Rajwade Sanshodhan Mandal, Dhule & Yashwantrao Chavan Pratishthan, Mumbai

(8A)

वासुदेवोसौप्राहतौमुनिसत्तमौ ॥ ४१ ॥ मायाविनोमहात्मानौबहवःसंतिसत्तमौ ॥ तत्रसाश्रीमतीदेवीहृताकेनापिसुव्रतौ ॥ ४२ ॥ चक्रपाणिरहंनित्यंचतुर्बाहुरितिस्थितिः तस्मान्नाहमतथ्यंवैभवद्भ्यांविदितंहितत् ॥ ४३ ॥ इत्युक्तौप्रणिपत्यैनमूचतुःप्रीतमानसौ ॥ कोत्रदोषस्तवविभोनारायणजगत्पते ॥ ४४ ॥ दौरात्म्यंतुनृपस्यैवमायांहिकृतवानसौ ॥ इत्युक्त्वाजग्मतुस्तस्मान्मुनीनारदपर्वतौ ॥ ४५ ॥ अंबरीषंसमासाद्यशापेनैनमयोजयत् ॥ नारदःपर्वतश्चैवयस्मादावामिहागतौ ॥ ४६ ॥ आहूयपश्चादन्यस्मैकन्यांत्वंदत्तवानसि ॥ मायायोगेनतस्मात्त्वांतमोऽज्ञाभिभविष्यति ॥ ४७ ॥ तेननात्मानमत्यर्थंयथावत्त्वंहिवेत्स्यसि ॥ एवंशापेप्रदत्तेतुतमोराशिरथोत्थितः ॥ ४८ ॥ नृपंप्रतिततश्चक्रंविष्णोःप्रादुरभूत्क्षणात् ॥ चक्रवित्रासितंघोरंतावुभावभ्यगात्तमः ॥ ४९ ॥ ततःसंत्रस्तसर्वांगौधावमानौमहामुनी ॥ पृष्ठतश्चक्रमालोक्यतमोराशिंचदुर्मदं ॥ ५० ॥ कन्यासिद्धिरहोप्रामास्यावयोरितिवेगितौ ॥ लोकालोकांतमनिशंधावमानौतमोऽर्दितौ ॥

१ अत्रद्विवचनांतानित्रीणिसंबोधनानि २ तमः अज्ञेतिछेदः

॥५१॥ त्राहित्राहीतिगोविंदंभाषमाणौभयार्दितौ ॥ विष्णुलोकंततोगत्वानारायणज
गत्पते॥ ५२ ॥ वासुदेवहृषीकेशपद्मनाभजनार्दन॥ त्राह्यावांपुंडरीकाक्षनाथोसिपुरु
षोत्तम॥ ५३॥ इत्यूचतुर्वासुदेवंमुनीनारदपर्वतौ ॥ ततोनारायणोऽचिंत्यः श्रीमान्श्री
वत्सलांछनः॥५४॥ निवार्यचक्रंध्वांतंचभक्तानुग्रहकाम्यया॥ अंबरीषश्चमद्भक्तस्तथेमौ
मुनिसत्तमौ ॥ ५५ ॥ अनयोर्नृपस्यचतथाहितंकार्यमयापुनः॥ आहूयतौततः श्रीमान्
गिराप्रल्हादयन्हरिः॥५६॥ उवाचभगवान्विष्णुःश्रूयतामितिमेवचः॥क्षमेतांमुनिशार्दू
लौभक्तसंरक्षणायमे॥ ५७॥ अपराद्धंचचक्रेणक्षमाशीलाहिसाधवः॥ ततस्तौमुनिशा
र्दूलौमायांतस्यावबुध्यच॥ ५८ ॥ददतुश्चततःशापंविष्णुमुद्दिश्यकोपनौ॥ श्रीमतीहरणं
विष्णोयत्कृतंछद्मनात्वया ॥ ५९ ॥ यथामूर्त्यांतथैवत्वंजायेथामधुसूदन॥ अंबरीषस्या
न्ववायेराज्ञोदशरथस्यहि॥६०॥ पुत्रस्त्वंभवितापुत्रीश्रीमतीधरणीप्रजा॥भविष्यतिवि
देहश्चप्राप्यतांपालयिष्यति ॥ ६१ ॥ राक्षसापसदःकश्चित्तांतेभार्यांहरिष्यति ॥ यतोराक्ष ॥८॥

१ इतिविचार्यैतिशेषः

(9A)

सधर्मेणहृताचश्रीमतीशुभा ॥ ६२ ॥ अतस्तेरक्षसाभार्याहर्तव्याछद्मनाच्युत ॥ यथा
प्राप्तंमहद्दुःखमावाभ्यांश्रीमतीकृते ॥ ६३ ॥ हाहेतिरुदतालभ्यंतथादुःखंचतत्कृते ॥ इत्यु
क्तवंतौतौविप्रौप्रोवाचमधुसूदनः ॥ ६४ ॥ अंबरीषस्यान्ववायेभविष्यतिमहायशाः ॥
श्रीमान्दशरथोनामभूमिपालोऽतिधार्मिकः ॥ ६५ ॥ तस्याहमग्रजःपुत्रोरामोनामभवा
म्यहं ॥ तत्रमेदक्षिणोबाहुर्भरतोभविताकिल ॥ ६६ ॥ शत्रुघ्नोवामबाहुश्चशेषोसौलक्ष्म
णःस्वयं ॥ ऋषिशापोनचैवस्यादन्यथाचक्रगम्यतां ॥ ६७ ॥ ऋषिशापतमोराशेयदारा
मोभवाम्यहं ॥ तत्रमांसमुपागच्छगच्छेदानींनृपंविना ॥ ६८ ॥ त्यक्त्वापिचमुनिश्रेष्ठावि
तिस्मप्राहमाधवः ॥ एवमुक्तेतमोनाशंतत्क्षणाच्चजगामवै ॥ ६९ ॥ आत्मार्थसंचितंतेन
प्रभुणाभक्तरक्षिणा ॥ निवारितंहरेश्चक्रंयथापूर्वमतिष्ठत ॥ ७० ॥ मुनिश्रेष्ठौभयान्मुक्तौ
प्रणिपत्यजनार्दनं ॥ निर्गतौशोकसंतप्तावूचतुस्तौपरस्परं ॥ ७१ ॥ अद्यप्रभृतिदेहांतमा
वांकन्यापरिग्रहं ॥ नकरिष्यावइत्युक्त्वाप्रतिज्ञायचतावृषी ॥ ७२ ॥ मौनध्यानपरौशुद्धौ
यथापूर्वंव्यवस्थितौ ॥ अंबरीषोपिराजासौपरिपाल्यचमेदिनीं ॥ ७३ ॥ सभृत्यज्ञातिसं

Rajawade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

बंधोविष्णुलोकंजगामवै॥ मानार्थमंबरीषस्यतथैवमुनिसिंहयोः॥७४॥ रामोदाशरथि
र्भूत्वातमसालुप्तबुद्धिकः॥ कदाचित्कार्यवशतःस्मृतिःस्यादात्मनःप्रभोः॥७५॥ पूर्णा
॥ ९ ॥ र्थोपिमहाबाहुरपूर्णार्थइवप्रभुः॥ अनुग्रहायभक्तानांप्रभूणामीदृशीगतिः॥७६॥ मायां
कृत्वामहेशस्यप्रोत्थितामानुषीतनुः॥ तस्मान्मायानकर्तव्याविद्वद्भिर्दोषदर्शिभिः॥७७॥
एतत्तेकथितंसर्वंरामजन्मकथाश्रयं॥ अंबरीषस्यमाहात्म्यंमायावित्वंचवैहरेः॥७८॥यः
पठेच्छृणुयाद्वापिमायावित्वंहरेर्विभोः॥ मायांविसृज्यपुण्यात्माविष्णुलोकंसगच्छति॥
॥७९॥ दशरथसुतजन्मकारणंयःपठतिशृणोत्यनुमोदतेद्विजेंद्रः॥ व्रजतिसभगवद्गृहा
तिथित्वंनहिशमनस्यभयंकुतश्चिदस्य॥ ८०॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआ
दिकाव्येअद्भुतोत्तरकांडेश्रीरामजन्मोपक्रमश्चतुर्थःसर्गः॥ ४॥ ॥ ७॥ ॥ ७॥
भरद्वाजशृणुष्वाथसीताजन्मनिकारणं॥पुरात्रेतायुगेकश्चित्कौशिकोनामवैद्विजः॥१॥
वासुदेवपरोनित्यंनामगानरतःसदा॥ भोजनासनशय्यासुसदातद्गतमानसः॥ उदारच ॥ ९ ॥
रितंविष्णोर्गीयमानःपुनःपुनः॥ २॥ विष्णुस्थलंसमासाद्यहरेःक्षेत्रमनुत्तमं॥ अगाय

(10A)

तर्हरिंतत्रतालवल्गुलयान्वितं ॥ ३॥ मूर्छनामूर्छयोगेनश्रुतिमंडलवेदितं॥ भक्तियोग
समापन्नोभिक्षामश्नातितत्रवै ॥ ४ ॥ तत्रैनंगायमानंचदृष्ट्वाकश्चिद्द्विजस्तदा ॥ पद्मा
क्षइतिविख्यातस्तस्मैचान्नंददौसदा ॥ ५ ॥ सकुटुंबोमहातेजाअश्नन्नन्नंचतस्यवै ॥
कौशिकोहितदात्दृष्टोगायन्नास्तेहरिंप्रभुं॥ ६ ॥श्रृण्वन्नास्तेसपद्माक्षःकालेकालेचभक्ति
तः॥ कालयोगेनसंप्राप्ताःशिष्यावैकौशिकस्यच॥ ७॥ सप्तराजन्यवैश्यानांविप्राणांकु
लसंभवाः॥ज्ञानविद्याधिकाःशुद्धावासुदेवपरायणाः ॥८॥ तेषामपितथान्नाद्यंपद्मा
क्षःप्रददौस्वयं॥ शिष्यैश्चसहितोनित्यंकौशिकोहृष्टमानसः॥ ९ ॥ विष्णुस्थलेहरिंतत्रआ
स्तेगायन्यथाविधि ॥तत्रैवमालवोनामवैद्योविष्णुपरायणः॥ १० ॥दीपमालांहरेर्नित्यं
करोतिप्रीतमानसः॥ मालतीनामभार्यासीत्तस्यनित्यंपतिव्रता ॥ ११ ॥ गोमयेनसमा
लिप्यहरेःक्षेत्रंसमंततः॥ भर्त्रासहास्तेसंप्रीताश्रृण्वतीगानमुत्तमं ॥ १२॥ कुशस्थलीस
मुत्पन्नाब्राह्मणाःसंशितव्रताः॥ पंचाशद्वैसमापन्नाहरेर्गानार्थमुत्तमाः॥ १३॥ साधयंतो
हिकार्याणिकौशिकस्यमहात्मनः ॥ गानविद्यार्थतत्वज्ञाःश्रृण्वंतोत्यवसंस्तुते ॥ १४ ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com